## सप्तमः पाठः

# लोभः पापस्य कारणम्

एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते। भोः भोः पान्थाः! इदं सुवर्ण-कङ्कणं गृह्यताम्। ततो लोभाकृष्टेन केनचित् पान्थेनालोचितम्– भाग्येनैतत् संभवति किन्तु अस्मिन् आत्मसन्देहे प्रवृत्तिर्न विधेया। यतः–

**न संशयमनारुह्य नरो भद्राणि पश्यति।**
**संशयं पुनरारुह्य यदि जीवति पश्यति।।**

स आह– कुत्र तव कङ्कणम्? व्याघ्रो हस्तं प्रसार्य दर्शयति। पान्थोऽवदत्– कथं मारात्मके त्वयि विश्वासः। व्याघ्र उवाच– शृणु रे पान्थ! प्रागेव यौवनदशायाहमतीव दुर्वृत्त आसम्। अनेकगोमानुषाणां बधान्मे पुत्रा मृताः दाराश्च वंशहीनश्चाहम्। ततः केनचिद् धार्मिकेणाहमादिष्टः– दानधर्मादिकं चरतु भवान्। तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो न कथं विश्वासभूमिः। मम चैतावान् लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मैकस्मैचिद् दातुमिच्छामि। तथापि व्याघ्रो मानुषं खादति इति लोकप्रवादो दुर्निवारः। मया च धर्मशास्त्राणि अधीतानि–

**मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा।**
**दरिद्रे दीयते दानं सफलं पाण्डुनन्दन।।**
**मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।**

त्वं चातीव दुर्गतः तत्तुभ्यं सुवर्णकङ्कणं दातुं सयत्नोऽहम्। यतः–

**दरिद्रान् भर कौन्तेय मा प्रयच्छेश्वरे धनम्।**
**व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः।।**

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण। ततो यावदसौ तद्वचः प्रतीतो लोभात् सरः स्नातुं प्रविशति तावत् महापङ्के निमग्नः पलायितुमक्षमः। पङ्के पतित दृष्ट्वा व्याघ्रोऽवदत्–अहह! महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण भक्षितः। **(हितोपदेश)**

## अभ्यास प्रश्न

### ➨ लघु उत्तरीय प्रश्न

१. लोभः कस्य कारणम् अस्ति?
२. व्याघ्रो हस्तं प्रसार्य पान्थं किमदर्शयत्?
३. व्याघ्रस्य वचनं श्रुत्वा पथिकः किम् अचिन्तयत्?
४. पान्थं पङ्के पतितं दृष्ट्वा व्याघ्रः किम् अवदत्?
५. दानं कस्मै दातव्यम्?
६. पापस्य किम् कारणम् अस्ति?
७. व्याघ्रे यौवने कीदृशः आसीत्?
८. व्याघ्रस्य सम्बन्धे कः लोकप्रवादः?
९. सः पथिकः केन भक्षितः?
१०. पण्डितः कः भवति?

## ➡ अनुवादात्मक प्रश्न

**१. अधोलिखित अवतरणों का ससन्दर्भ हिन्दी-अनुवाद कीजिए–**

(क) शृणु रे पान्थ! व्याघ्र उवाच– ..................... दातुमिच्छामि।
(ख) मरुस्थल्यां ................................................ पण्डितः।
(ग) त्वं चातीव................................................किमौषधैः।
(घ) तदत्र सरसि ............................................... भक्षितः।
(ङ) मातृवत् ............................................... स पण्डितः।

**२. अधोलिखित सूक्तिपरक पंक्तियों की ससन्दर्भ हिन्दी-व्याख्या कीजिए–**

(क) न संशयमनारुह्य नरो भद्राणि पश्यति।
(ख) मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्।
(ग) दरिद्रे दीयते दानं सफलं पाण्डुनन्दन।
(घ) आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।
(ङ) व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः।
(च) लोभः पापस्य कारणम्।

**३. अधोलिखित वाक्यों का संस्कृत में अनुवाद कीजिए–**

(क) लोभ पाप का कारण होता है।
(ख) दरिद्र को दान देना चाहिए।
(ग) तेरा कंगन कहाँ है?
(घ) धनवान् को धन मत दो।

## ➡ व्याकरणात्मक प्रश्न

**१. निम्नलिखित में सन्धि-विच्छेद कीजिए–**

पान्थोऽवदत्, लोभाकृष्टः, चैतावान्।

**२. निम्नलिखित में विभक्तियाँ बताइए–**

भाग्येन, सन्देहे, उपदेशात्, व्याघ्रः।

**३. निम्नलिखित क्रियापदों में धातु, पुरुष एवं वचन बताइए–**

अपश्यन्, पश्यति, तिष्ठति, इच्छामि।

## शब्दार्थ

**स्नातः** = स्नान करके। **कुशहस्तः** = हाथ में कुशा लिये हुए। **पान्थाः** = हे पथिकों। **पान्थेनालोचितम्** = (पान्थेन + आलोचितम्) पथिक ने सोचा। **भाग्येनैतत्** = (भाग्येन + एतत्) भाग्य से यह। **अनारुह्य** = बिना चढ़े हुए। **पुनरारुह्य** = (पुनः + आरुह्य) फिर चढ़कर, फिर प्राप्त करके। **प्रसार्य** = फैलाकर। **मारात्मके त्वयि** = हिंसा करनेवाले तुझ पर। **प्रागेव** = (प्राक् + एव) पहले ही। **दाराश्च** = (दाराः + च) और स्त्री। **धार्मिकेणाहमादिष्टः** = (धार्मिकेण + अहम् + आदिष्टः) धार्मिक ने मुझे आदेश दिया। **तदुपदेशादिदानीमहम्** = (तद् + उपदेशात् + इदानीम् + अहम्) उसके उपदेश से अब मैं। **गलितनखदन्तः** = गिरे हुए नाखून और दाँतोंवाला। **लोकप्रवादः** = लोकनिन्दा। **दुर्निवारः** = नहीं हट सकती। **मा** = मत (नहीं)। **प्रयच्छेश्वरे** = (प्रयच्छ + ईश्वरे) समर्थ को दो। **व्याधितस्य** = रोगी की। **नीरुजस्य** = नीरोगी की। **पङ्के** = कीचड़ में। **निमग्नः** = फँसा हुआ। **पलायितुमक्षमः** = (पलायितुम् + अक्षमः) भागने में असमर्थ। **अतस्त्वामहमुत्थापयामि** = (अतः + त्वाम् + अहम् + उत्थापयामि) इसलिए तुझे मैं निकालता हूँ। **मारात्मक** = हिंसक। **दुर्वृत्तः** = दुराचारी। **प्रतीतः** = विश्वास करके। **शनैः-शनैः** = धीरे-धीरे। **उपगम्य** = पास जाकर।

●●